पद्योत्थेवमादिनोक्तं पञ्चमम्। अर्धचैश: षष्ठं, पुनः पच्छः सप्तमम्। एतत् दूरोहणं भवति। सप्तमवाननियमेन त्र्टक् सप्तकृत्वोऽभ्यस्ता दूरोहणमिति ज्ञापनार्थम्। एवकारः पौनर्वचनिकः” नारा० “एतत् दूरोहणम्” ८।२।१५ दूरोहणमिति प्रकृते पुनर्दूरोहणवचनं द्विविधं दूरोहणमस्तीति प्रदर्शनार्थं तेन स्वर्गकामस्य चतुरभ्यस्तेन दूरोहणं भवति” नारा०।

**दूर्य्य** न० दूरे उत्सार्य्यम् दूर+यत्। १पुरीषे विष्ठायाम् शब्दर० “ततः कल्यं समुत्थाय कुर्य्यान्मूत्रं नरेश्वर!। नैर्ऋत्यामिषुविक्षेपमतीत्याभ्यधिकं भुवः” विष्णु पु० तस्य इषुविक्षेपस्थानातिक्रमेण त्यागविधानेन दूरोत्सार्य्यत्वात् तथात्वम्। दूराय रोगदूरीकरणाय साधु यत्। २शय्याम् राजनि०।

**दूर्वा** स्त्री दूर्वति रोगान् अनिष्टं वा दुर्व-हिंसायाम् अच् रेफे परे पूर्वाणो दीर्घः। १स्वनामख्याते घासभेदे तद्भेदादिकं भावप्र० उक्तं यथा

“नीलदूर्वा रुहानन्ता भार्गवी शतपर्विका। शष्पं सहस्रवीर्य्या च शतवल्ली च कीर्त्तिता। नीलदूर्वा हिमा तिक्ता मधुरा तुवरा हरेत्। कफपित्तास्रवीसर्पतृष्णादाहत्वगामयान्”। श्वेतदूर्वा “दूर्वा शुक्ला तु गोलोमी शतवीर्य्या च कथ्यते। श्वेतदूर्वा कषाया स्यात् स्वाद्वी व्रण्या च जीवनी। तिक्ता हिमा विसर्पास्रतृट्पित्तकफदाहहृत्”। गण्डदूर्वा

“गण्डदूर्वा तु गण्डाली मत्स्याक्षी शकुलाक्षकः। गण्डदूर्वा हिता लोहद्राविणी ग्राहिणी लघुः। तिक्ता कषाया मधुरा वातकृत् कटुपाकिनी। दाहतृष्णाबलासास्रकुष्ठपित्तज्वरापहा”। तस्या उत्पत्तिकथा भविष्योत्तरे “क्षीरोदसागरे पूर्वं मथ्यमानेऽमृतार्थिना। विष्णुना बाहुजङ्घाभ्यां विधृत्य मन्दरं गिरिम्। भ्रमता तेन वेगेन लोमान्यावर्षितानि वै। ऊर्मिभिस्तानि रोमाणि चोत्क्षिप्तानि तटान्तरे। अजायत शुभा दूर्वा रम्या हरितशाद्वला। एवमेषा समुत्पन्ना दूर्वा विष्णुतनूद्भवा। तस्या उपरि विन्यस्तं मथितामृतमुत्तमम्। देवदानवगन्धर्वयक्षविद्याधरोरगैः। तत्र येऽमृतकुम्भस्य निपेतुर्वारिबिन्दवः। तैरियं स्पर्शमासाद्य दूर्वा चैवाजराऽमरा। वन्द्या पवित्रा देवैस्तु सर्वदाऽभ्यर्चिता तथा”। “दूर्वा दहति पापानि धात्री हरति पातकम्। हरीतकी हरेद्रोगं तुलसी हरते त्रयम्” विष्णुधर्मोत्तरे। दूर्वा पूज्यत्वेनास्त्यस्याम् अर्श० अच्। २भाद्रशुक्लाष्टम्यां तद्दिने दूर्वायाः पूजाविधानात् तस्याः तथात्वम् “श्रावणी दौर्गनवमी दूर्वा चैव हुताशनी। पूर्वविद्धैव कर्त्तव्या शिवरात्रिर्बलेर्दिनम्” कालमाधवीयधृतवाक्यम् व्रतशब्दे दूर्वाष्टमीव्रते तत्पूजाविधानं दृश्यम्। ततः समूहे काण्डच्। दूर्वाकाण्ड दूर्वासमूहे न० “दूर्वाकाण्डमिव श्यामा” भट्टिः। दूर्वया दुर्गापूजननिषेधः “अक्षतैर्नार्चयेत् विष्णुं न तुलस्या विनायकम्। न दूर्वया यजेत् दुर्गां नोन्मत्तेन दिवाकरम्” आगमः। दुर्गायै अर्घ्यान्तर्वर्त्तिदूर्वादानं तु न निषिद्धमिति तु तत्त्वम्। जनमेजयवंश्ये ३नृपभेदे पु० “नृपञ्जयस्ततो दूर्वस्तिमिस्तस्माज्जनिष्यति” भाग० ९।२२।२९

**दूर्वाक्षी** स्त्री वसुदेवभ्रातृभेदस्य वृकस्य पत्न्याम् “तक्षपुष्करमालादीन् दूर्वाक्ष्यां वृक आदधे” भाग० ९।२४। २३श्लो०

**दूर्वाद्यघृत** न० चक्रदत्तोक्ते घृतभेदे तत्पाकविधिस्तत्रोक्तो यथा

“दूर्वा सोत्पलकिञ्जल्का मञ्जिष्ठा सैलवालुका। सिता शीतमुशीरञ्च मुस्तं चन्दनपद्मकौ। विपचेत् कार्षिकैरेतैः सर्पिराजं सुखाग्निना। तण्डुलाम्बु त्वजाक्षीरं दत्त्वा चैव चतुर्गुणम्। तत्पानं वमतो रक्तं प्लावनं नासिकागते। कर्णाभ्यां यस्य गच्छेत् तु तस्य कर्णौ प्रपूरयेत्। चक्षुःस्राविणि रक्ते तु पूरयेत् तेन चक्षुषोः। मेढ्रपायुप्रवृत्ते तु वस्तिकर्मसु योजयेत्। रोमकूपप्रवृत्ते तु तदभ्यङ्गे प्रयोजयेत्”।

**दूर्वाष्टमी** स्त्री दूर्वाप्रिया तत्पूजाङ्गत्वात् अष्टमी। भाद्रशुक्लाष्टम्याम् तस्या उभयदिनव्याप्तौ पूर्वदिने पूजा “श्रावणी दौर्गनवमी दूर्वा चैव हुताशनी। पूर्वविद्धैव कर्त्तव्या शिवरात्रिर्बलेर्दिनम्” ति०त० धृतवचनात्। दूर्वापूजाप्रकारश्च त्रिविधः हेमा० व्रतख० उक्तः व्रतशब्दे दृश्यः गौडदेशे तु भविष्योत्तरपुराणोक्तस्तत्प्रकारः प्रचलितः।

**दूर्वासोम** पु० सुश्रुतोक्ते रसायनाङ्गे सोमलताभेदे यथोक्तं तत्र उत्तरतन्त्रे

“अंशुमान्मुञ्जवांश्चैव चन्द्रमा रजतप्रभः। दूर्वासोमः कनीयांश्च श्वेताक्षः कनकप्रभः। प्रतानवांस्तालवृन्तः करवीरोंऽशवानपि। स्वयम्प्रभो महासोमो यश्चापि गरुडाहृतः। गायत्रस्त्रैष्टुभः पाङ्क्तो जागतः शाङ्करस्तथा। अग्निष्टोमो रैवतश्च यथोक्त इति संज्ञितः। गायत्र्या त्रिपदा युक्तो यश्चोडुपतिरुच्यते। एते सोमाः समाख्याता वेदोक्तैर्नामभिःपुनः। सर्वेषामेव चैतेषामेको विधिरुपासने। सर्वे तुल्यगुणाश्चैव विधानं तेषु